दिनाङ्कः :- 15.10.2024

सायं - 06:20

<u>मुख्यवार्ताः</u>

- महाराष्ट्रराज्ये नवम्बरमासस्य विंशे दिनाङ्के एकचरणीय-मतदानम्, झारखण्डे च नवम्बरमासस्यैव त्रयोदश-विंशति-दिनाङ्कयोः द्विचरणीय मतदानं भविष्यति।
- प्रधानमन्त्री नरेन्द्रमोदी आंककीय-प्रौद्योगिक्याः वैश्विकरूपरेखास्थापनस्य महत्त्वम् आम्रेडितवान्। अद्य नवदिल्ल्यां अन्ताराष्ट्रिय- दूरसंचारसंघस्य विश्वदूरसञ्चारमानकीकरणसभायाः, भारतमोबाईलकाङ्ग्रेस इत्यस्य उद्घाटनमपि अकरोत्।
- विदेशमन्त्री एस. जयशंकरः शङ्घाई-सहयोग-संघटन इत्यस्य शिखरसम्मेलने भागग्रहीतुं पाकिस्तानस्य द्विदिवसीययात्रायां इस्लामाबादं प्राप्तवान्।
- देशस्य रक्षाक्षमतां वर्धयितुं भारतेन अमेरिकादेशात् एकत्रिंशत् प्रीडेटर-ड्रोनिति विमानानाम् क्रयणस्य अनुबन्धः कृतः।
- आईएसएसएफ विश्वचषकस्य अन्तिमद्वन्द्वे महिलानां दशमीटरात्मक एयर राइफल इति स्पर्धायां भारतस्य लक्ष्यभेदिकया सोनम-मस्कर इत्यनया रजतपदकं प्राप्तम्।

<u>निर्वाचनायोगः-निर्वाचनकार्यक्रमः</u>

महाराष्ट्रे आगामिनः मासस्य विंशे दिनाङ्के एकस्मिन् चरणे अथ च झारखण्डे त्रयोदश-विंशति-दिनाङ्कयोः द्वयोः चरणयोः विधानसभा-निर्वाचने आयोजयिष्येते। तत्रैव मतगणना आगामिनः मासस्यैव त्रयोविंशे दिनाङ्के भविष्यति। ध्यातव्यमस्ति यत् निर्वाचनायोगेन अद्य महाराष्ट्र-झारखण्ड-विधानसभा-निर्वाचनानां कार्यक्रमाः उद्घोषिताः। अद्य नवदिल्ल्यां निर्वाचनकार्यक्रमान् उद्घोषयन् मुख्य-निर्वाचनायुक्तः राजीवकुमारः समुदीरितवान् यत् अष्टाशीत्यधिकद्विशत-सदस्यात्मकायाः महाराष्ट्र-विधानसभायाः निर्वाचनस्य अधिसूचना मासस्यास्य द्वाविंशे दिनाङ्के प्रख्यापयिष्यते। तदनु प्रत्याशिनः नवविंशतिदिनाङ्कं यावत् नामाङ्कन-पूरण प्रक्रियां कर्तुं शक्नुवन्ति। झारखण्डराज्ये प्रथमचरणीय मतदानाय अधिसूचना अस्मिन् एव मासे अष्टादशदिनाङ्के प्रसारिता भविष्यति, प्रत्याशिनश्च पञ्चविंशतिदिनाङ्के नामाङ्कन पत्रं पूरयितुं शक्नुवन्ति। एतस्मिन् राज्ये द्वितीयचरणीय-मतदानाय अधिसूचना अस्य मासस्य द्वाविंशतिः दिनाङ्के प्रसारयिष्यते नवविंशतिः दिनाङ्के च प्रत्याशिनः तत्सम्बद्धानि पत्राणि प्रपूरयितुं अर्हाः भविष्यन्ति इति। निर्वाचनकार्यक्रमाणां घोषणया साकमेव उभयोः राज्ययोः आदर्शाचारसंहिता क्रियान्विता जाता। आयोगेन अत्रावसरे अनेकेषु विधानसभासनेषु द्वयोः लोकसभासनयोश्च उपनिर्वाचनस्य कार्यक्रमाणां नियमावल्यः प्रसारिताः।

<u>प्रधानमन्त्री/कृत्रिमबुद्धिमत्ता</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना आंककीय-प्रौद्यौगिक्याः वैश्विकसंरचनायाः महत्वम् आम्रेडितम्। तेन नवदिल्ल्याः आई.टी.यू. इत्याख्यायाः विश्वदूरसंचार-मानकीकरणसभायाः इण्डिया-मोबाइल-कांग्रेस इत्यस्य च उद्घाटनं कृतम्। सम्बोधनप्रसङ्गे तेनोक्तम् यत् सुरक्षा-सम्मान-समानताश्च सर्वासां चर्चानां केन्द्रे भवेयुरिति। तेन सबलं प्रतिपादितं यत् भारतेन-जी-विंशतिः इत्यस्याः अध्यक्षतायां विषयोऽयं समुत्थापितः, अपेक्षितश्च यत् वैश्विक-संस्थानानि वैश्विक-शासने अस्य महत्वं स्थापयन्त्विति।

प्रधानमन्त्री मोदी अग्रे उक्तवान् यत् भारतदेश: आंककीय-जन-आधारभूतसंरचनाया: क्षेत्रे प्राप्तानां साफल्यानुभवानां संसारेण सह वितरणाय सन्नद्घोऽस्तीति। तेनोक्तं यत् भारतदेश: फाइव-जी इत्यस्य विश्वस्मिन् सर्वातिबृहत्तर:द्वितीय: विपणि-देश: अस्ति। साम्प्रतञ्च प्रशासनम् सिक्स-जी इति प्रौद्यौगिक्या: क्षेत्रेऽपि सजवं कार्यं कुर्वदस्ति।

## राष्ट्रपति: अल्जीरिया यात्रा

राष्ट्रपति: द्रौपदीमुर्मु: त्रयाणां राष्ट्राणां यात्रान्तर्गतं अल्जीरियादेशस्य अल्जीयर्स इत्यत्र अद्य सिदी-अब्दुल्ला-विज्ञान-प्रौद्यौगिक-पोल-विश्वविद्यालयेन राजनीतिविज्ञानस्य विद्यावारिधे: उपाधिना सम्मानिता। इयम् उपाधि: अल्जीरियादेशीयेन उच्चशिक्षा-वैज्ञानिक-अनुसन्धानमन्त्रिणा श्रीकमाल-बद्दारी- इत्यमुना प्रदत्ता। सिदी-अब्दुल्ला विश्वविद्यालयं सम्बोधयन्ती राष्ट्रपति: अवोचत् यत् सम्मानमिदं भारत देशाय गौरवान्वितकरं विद्यते इति। अनया अत्रावसरे भणितं यत् शिक्षा असमानता: दूरीकरोतीति समेषां कृते च समानावसरान् प्रददाति। राष्ट्रपतिना अग्रे निगदितं यत् एतयो: राष्ट्रयो: युवान: पारस्परिक-कल्याणस्य सेतुत्वेनापिकार्यं करिष्यति, तावत् देशयोर्मध्ये वर्तमान-सौहार्दपूर्ण-सम्बन्धा: सुदृढा: भविष्यन्ति।

## विराम:

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

## शङ्घाई सम्मेलनम्

शङ्घाई-सहयोग-सङ्घटन-शिखर-सम्मेलनम् अद्यारभ्य पाकिस्तानस्य इस्लामाबादनगरे समारप्स्यते। विदेशमन्त्री डॉ. एस.जयशङ्कर: एतस्मिन् सम्मेलने भागग्रहणाय इस्लामाबाद नगरं प्रति गतवान्। विदेशमन्त्री उक्तवान् यत् तस्य पाकिस्तानदेशयात्रा बहुविधकार्यक्रमेभ्य: अस्ति अपि च तत्र द्विपक्षीयवार्ता नैव विधास्यते इति।

## एपीजे अब्दुलकलाम:

प्राक्तनस्य राष्ट्रपते: एपीजे-अब्दुल-कलाम-वर्यस्य अद्य जन्मोत्सव: वर्तते। एकत्रिंशदधिक-एकोनविंशतितमवर्षस्य अस्मिन्नेव दिने तस्य जन्म तमिलनाडुराज्यस्य रामेश्वरमिति क्षेत्रे अभवत्। श्रीकलाम: वैज्ञानिक-आभियान्त्रिक्यां विशेषज्ञतां समुपलभ्य भारताय स्वदेशनिर्मितस्य अन्तरिक्षयानस्य विनिर्माणे परियोजना-निदेशकत्वेन कार्यं कृतवान्। भारतस्य स: प्रक्षेपास्त्रपुरूषत्वेनापि तस्याभिधानं प्रथते। परं श्रीमता कलामवर्येण देशस्योन्नतौ शान्ते: महत्वमेव प्रतिपादितम्। अवसरेऽस्मिन् राष्ट्रपति: उपराष्ट्रपति: प्रधानमन्त्री च श्रीमते कलामाय श्रद्धासुमनानि समर्पितवन्त:।

-

## महाराष्ट्र-काङ्ग्रेसदलप्रवेश:

भाजपेतिदलस्य पूर्वविधायक: ध्रूपदराव-साइले: अन्ये च जना: ह्य: महाराष्ट्रस्य कांग्रेसप्रभारिण: रमेश-चेन्निथलाइत्यस्य महाराष्ट्रप्रदेशस्य च कांग्रेस-समूहस्य अध्यक्षस्य नानापटोले इत्यस्य उपस्थित्यां कांग्रेसदले

समाविष्टवन्तः। एतस्मिन् दले मनसेदलस्य विट्ठल-लोखण्डकरः भाजपेतिदलस्य पूर्वविधायकः अविनाश-घाटेः राकांपा-दलस्य कमालफारुखी उमरफारुखी इत्येतैः सह अन्ये च जनाः प्रविष्टवन्तः।

## रेलमन्त्री

रेलमन्त्रिणा अश्विनी-वैष्णवेन अद्य महाराष्ट्रस्य देवलाली-दानापुरयोः मध्ये प्रचाल्यमानाय नवीन-विशिष्टरेलयानाय दृश्य-श्रव्य-परान्तर्जालीयमाध्यमेन हरितध्वजः प्रदर्शितः। अनेन शेतकरी-समृद्धि-विशिष्ट-रेलयानेन देवलाली-दानापुर-इत्यनयोः कृषक-उपभोक्तृणां मध्ये सम्पर्कं संवर्धयिष्यति।

## भारत-अमेरिका/ड्रोन

राष्ट्रस्य रक्षा-क्षमतानां संवर्धनाय अमेरिका-भारताभ्यां एकत्रिंशत् एम.क्यू. नाईन्-बी प्रीडेटर-ड्रोन इत्यस्य क्रयणाय अनुबन्धपत्राणि हस्ताक्षरितानि। अनुबन्धस्य लक्ष्यमस्ति यत् देशस्य परिचालन-तत्परतया सह सैन्यशक्तेः परिवर्धनाय च क्रयणोपक्रमेऽस्मिन् एम.क्यू. नाईन्-बी स्काई गार्जिन इति अद्य सी-गार्जिन-ड्रोन इत्यनयोः च त्रिभ्यः सेनाभ्यः क्रयणमपि सम्मिलितं वर्तते। रक्षामन्त्रालयेन अद्य नवदिल्ल्यां रक्षासचिवस्य गिरधर-अरामने इत्यस्य उपस्थितौ अमेरिकाप्रशासनेन सह एकस्मिन् अनुबन्धात्मक-सन्धिपत्रे हस्ताक्षरं विहितम्।

## सोनम-उत्तम-मसकर

भारतीय-लक्ष्य-भेदिकया सोनम-उत्तम-मसकर इत्यनया आई. एस. एस.एफ.इति अस्य वर्षस्य नवदिल्ल्यां क्रीड्यमानायां विश्वचषकस्पर्धायां महिलानां दशमीटरात्मक एयर-रायफलेति भुशुण्ड्या लक्ष्यभेदनस्पर्धायां रजतपदकं विजितम्। द्वाविंशतिवर्षीयया मसकर इत्यनया अन्तिम-क्रीडाचक्रे द्वितीयं स्थानं लब्धम्। चीनदेशस्य यूटिंग-ह्वंग इत्यनया च स्वर्णपदकं विजितम्। तत्रैव फ्रांसदेशस्य लक्ष्यभेदिकया ओसिएने मुल्लर इत्यनया कांस्यपदकं प्राप्तम्।

## डेनमार्क ओपन/सिंधु

अस्य वर्षस्य डेनमार्क-ओपनेति बैडमिंटनस्पर्धायां भारतस्य पीवी सिंधुः अद्य संध्यायां महिला-एकलेति वर्गे स्वकीयां प्रारम्भिक स्पर्धां चीनदेशस्य ताइपे-की-पाई यू-पो इत्येताम् विरुध्य क्रीडिष्यति। लक्ष्यसेनः चीनदेशस्य लू-गूआंग-जू इत्यमुं विरुध्य अक्रीडत्। चक्रत्रयेषु चक्रद्वयं पराभूय पराजितश्च।

।।इति वार्ताः।।